✧˖°*❋ ❋*°˖✧

# নব দুর্গা স্তোত্রম্

# Nava Durga Stotram
## in bengali

✧˖°*❋ ❋*°˖✧

# ॥ নব দুর্গা স্তোত্রম্ ॥

**গণেশঃ**
হরিদ্রাভংচতুর্বাদু হারিদ্রবসনংবিভুম্ ।
পাশাংকুশধরং দৈবংমোদকংদংতমেব চ ॥

**দেবী শৈলপুত্রী**
বংদে বাংছিতলাভায চংদ্রার্ধকৃতশেখরাং।
বৃষারূঢাং শূলধরাং শৈলপুত্রী যশস্বিনীম্ ॥

**দেবী ব্রহ্মচারিণী**
দধানা করপদ্মাভ্যামক্ষমালা কমংডলূ ।
দেবী প্রসীদতু মযি ব্রহ্মচারিণ্যনুত্তমা ॥

**দেবী চংদ্রঘংটেতি**
পিংডজপ্রবরারূঢা চংদকোপাস্ত্রকৈর্যুতা ।
প্রসাদং তনুতে মহ্যং চংদ্রঘংটেতি বিশ্রুতা ॥

**দেবী কূষ্মাংডা**
সুরাসংপূর্ণকলশং রুধিরাপ্লুতমেব চ ।
দধানা হস্তপদ্মাভ্যাং কূষ্মাংডা শুভদাস্তু মে ॥

**দেবীস্কংদমাতা**
সিংহাসনগতা নিত্যং পদ্মাশ্রিতকরদ্বযা ।
শুভদাস্তু সদা দেবী স্কংদমাতা যশস্বিনী ॥

**দেবীকাত্যাযণী**
চংদ্রহাসোজ্জ্বলকরা শার্দূলবরবাহনা ।
কাত্যাযনী শুভং দদ্যাদেবী দানবঘাতিনী ॥

## দেবীকালরাত্রি

একবেণী জপাকর্ণপূর নগ্না খরাস্থিতা ।
লংবোষ্ঠী কর্ণিকাকর্ণী তৈলাভ্যক্তশরীরিণী ॥

বামপাদোল্লসল্লোহলতাকংটকভূষণা ।
বর্ধনমূর্ধ্বজা কৃষ্ণা কালরাত্রির্ভযংকরী ॥

## দেবীমহাগৌরী

শ্বেতে বৃষে সমারূঢা শ্বেতাংবরধরা শুচিঃ ।
মহাগৌরী শুভং দদ্যান্মহাদেবপ্রমোদদা ॥

## দেবীসিদ্ধিদাত্রি

সিদ্ধগংধর্বযক্ষাদ্যৈরসুরৈরমরৈরপি ।
সেব্যমানা সদা ভূযাত্ সিদ্ধিদা সিদ্ধিদাযিনী ॥

✧˳·˖✶ ✶˖·˳✧

Free download PDF of all types of mantra, stotram,vandana,arati: chalisapdf.net